## प्रथमः पाठः

# लोकहितं मम करणीयम्

(संस्कृते गीतपरम्परा अति समृद्धा प्राचीना च। जनैःमनसिदृढ सङ्कल्पं कृत्वा कथमाचरणीयमित्यस्मिन् गीते वर्णितम्, गीतेऽस्मिन् जनेषु परोपकारभावनोत्पादनं दरीदृश्यते।)

मनसा सततं स्मरणीयम्, वचसा सततं वदनीयम्।
लोकहितं मम करणीयम्, लोकहितं मम करणीयम्॥1॥

न भोगभवने रमणीयम्, न च सुखशयने शयनीयम्।
अहर्निशं जागरणीयम्, लोकहितं मम करणीयम् ॥2॥ ॥ मनसा ॥

न जातु दुःखं गणनीयम्, न च निजसौख्यं मननीयम्।
कार्यक्षेत्रे त्वरणीयम्, लोकहितं मम करणीयम्॥3॥ ॥ मनसा ॥

दुःखसागरे तरणीयम्, कष्टपर्वते चरणीयम्।
विपत्ति-विपिने भ्रमणीयम्, लोकहितं मम करणीयम् ॥4॥ ॥ मनसा ॥

गहनारण्ये घनान्धकारे, बन्धुजना ये स्थिता गह्वरे।
तत्र मया सञ्चरणीयम्, लोकहितं मम करणीयम् ॥5॥ ॥ मनसा ॥

### शब्दार्थाः

| | | | | | |
|---|---|---|---|---|---|
| करणीयम् | – | करना चाहिये | त्वरणीयम् | – | शीघ्रता करनी चाहिये |
| दुःखसागरे | – | दुःख रूपी सागर में | कष्टपर्वते | – | कष्टरूपी पर्वत पर |
| गहनारण्ये | – | गहन वन में | गह्वरे | – | गुफा में |

### अभ्यासः

1. एकपदेन उत्तरं लिखत –

   क. मनसा किं करणीयम् ?

   ख. वचसा किं करणीयम्?

   ग. कस्मिन् न रमणीयम्?

   घ. किं न गणनीयम्?

   ङ. किं न मननीयम्?

**2. एकवाक्येन उत्तरं लिखत –**

क. कुत्र त्वरणीयम्?

ख. कस्मिन् तरणीयम्?

ग. कुत्र चरणीयम्?

घ. विपत्ति-विपिने किं करणीयम्?

ङ. मम किं करणीयम्?

**3. उचितं योजयत –**

| | (अ) | (ब) |
|---|---|---|
| क. | मनसा | सततं वदनीयम् |
| ख. | वचसा | सततं स्मरणीयम् |
| ग. | भोगभवने | जागरणीयम् |
| घ. | लोकहितं | न रमणीयम् |
| ङ. | अहर्निशं | करणीयम् |

**4. शुद्धवाक्यानां समक्षम् 'आम्' अशुद्धवाक्यानां समक्षं 'न' इति लिखत –**

क. कष्टपर्वते चरणीयम्। ☐

ख. दुःखसागरे न तरणीयम्। ☐

ग. न जातु दुःखं गणनीयम्। ☐

घ. विपत्ति-विपिने न भ्रमणीयम्। ☐

ङ. अहर्निशं जागरणीयम्। ☐

**5. उचितपदेन रिक्तस्थानं पूरयत –**

क. बन्धुजना ये स्थिता ..............। (सागरे / गह्वरे)

ख. लोकहितं .............. । (वदनीयम् / करणीयम्)

ग. भोगभवने ..............। (रमणीयम् / न रमणीयम्)

घ. कार्यक्षेत्रे ..............। (तरणीयम् / त्वरणीयम्)

ङ. कष्टपर्वते ..............। (करणीयम् / चरणीयम्)

**6. नामोल्लेखपूर्वकं समासविग्रहं कुरुत -**

| | | | |
|---|---|---|---|
| क. | लोकहितम् | ख. | भोगभवने |
| ग. | कार्यक्षेत्रे | घ. | दु:खसागरे |
| ङ. | कष्टपर्वते। | | |

**7. रिक्तस्थानं पूरयत -**

क. न ..........................गणनीयम् .......... मननीयम्।
..................... त्वरणीयम् लोकहितम्.................।।

ख. दु:खसागरे ............., कष्ट पर्वते .............।
.............भ्रमणीयम्, ............. करणीयम्॥

**8. उदाहरणानुसारं धातुं प्रत्ययं च पृथक्कुरुत -**

| उदाहरणम् - | | धातु: | + | प्रत्यय: |
|---|---|---|---|---|
| | स्मरणीयम् | स्मृ | + | अनीयर् |
| क. | करणीयम् | ............ | + | ..........। |
| ख. | रमणीयम् | ............ | + | ..........। |
| ग. | शयनीयम् | ............ | + | ..........। |
| घ. | जागरणीयम् | ............ | + | ..........। |
| ङ. | गणनीयम् | ............ | + | ..........। |
| च. | मननीयम् | ............ | + | ..........। |
| छ. | त्वरणीयम् | ............ | + | ..........। |
| ज. | तरणीयम् | ............ | + | ..........। |
| झ. | भ्रमणीयम् | ............ | + | ..........। |
| ञ. | सञ्चरणीयम् | ............ | + | ..........। |

**9. ''मम कर्त्तव्यम्'' इति विषयमवलम्ब्य संस्कृते दशवाक्यानि लिखत।**

**10. ''लोकहितं मम करणीयम्'' इत्यस्मिन् पाठे आगतानि अव्ययानि चित्वा लिखत।**

**योग्यताविस्तार: -**

- ''लोकहितं मम करणीयम्'' एतत् गीतं लयबद्धं गायत।
- ''लोकहितं मम करणीयम्'' इत्यस्मिन् पाठे आगतानि सप्तमीविभक्त्येकवचनरूपाणि चित्वा लिखत।
- ''लोकहितं मम करणीयम्'' अनेन सह अन्यानि अपि संस्कृतगीतानि कण्ठस्थं कुरुत।

*सर्वभूतहिते रता:।*